577. The divine elixir sends forth its juice through the cosmic woollen filter to the honey-dripping receptacles seven metres of the hymns praise it.[12]
(Cf. Ṛv IX.103.3)

(९) नवमी दशतिः

(१-८) अष्टर्चाया अस्या दशतेः (१) प्रथमाया ऋचः शाक्त्यो गौरिवीतिः, (२) द्वितीयाया आङ्गिरसा ऊर्ध्व-सद्मप्रभृतयः, (३) तृतीयाया भारद्वाज ऋजिश्वा, (४) चतुर्थ्या आङ्गिरसः कृतयशाः, (५) पञ्चम्या राजर्षिर्ऋणञ्चयः, (६) षष्ठ्या वासिष्ठः शक्तिः, (७-८) सप्तम्यष्टम्योश्चाङ्गिरस ऊरुर्ऋषयः। (१) प्रथमाया इन्द्रसोमौ, (२, ५-८) द्वितीयायाः पञ्चम्यादिचतसृणाञ्च सोमः, (३) तृतीयाया अश्वसोमौ, (४) चतुर्थ्याश्च वृषभसोमौ देवताः। (१-४, ६-७) प्रथमादिचतसृणां षष्ठीसप्तम्योश्च ककुबुष्णिक्, (५) पञ्चम्या यवमध्या गायत्री, (८) अष्टम्याश्च विष्टारपङ्क्तिश्छन्दांसि ॥

पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः। महि द्युक्षतमो मदः ॥१॥

अभि द्युम्नं बृहद्यश इषस्पते दिदीहि देव देवयुम्। वि कोशं मध्यमं युव ॥२॥

आ सोता परि षिञ्चताश्वं न स्तोममप्तुरꣳ रजस्तुरम्। वनप्रक्षमुदप्रुतम् ॥३॥

एतमु त्यं मदच्युतꣳ सहस्रधारं वृषभं दिवोदुहम्। विश्वा वसूनि बिभ्रतम् ॥४॥

Khaṇḍa XI

Daśati 9

578. Pavasva madhmattama indrāya soma kratuvittamo madaḥ.
Mahi dyukṣatamo madaḥ.$_1$
(Cf. S. 692; Ṛv IX.108.1)

579. Abhi dyumnam bṛhad yasa iṣaspate didīhi deva devayum.
Vi kośam madhyamam yuva.$_2$
(Cf. S. 1011; Ṛv IX.108.9)

580. Ā sotā pari ṣiñcatāsvam na stomam apturam rajasturam.
Vanaprakṣam udaprutam.$_3$
(Cf. S. 1394; Ṛv IX.108.7)

581. Etam u tyam madacyutam sahasra-dhāram vṛṣabham divo-duham.
Viśvā vasūni bibhratam.$_4$
(Cf. Ṛv IX.108.11)

Khaṇḍa XI

Daśati 9

578. O sweet-flavoured, most intelligent, exhilarator, elixir of divine love, flow for the aspirant self, the great, the most brilliant and full of bliss.1
(Cf. S. 692; Ṛv IX.108.1)

579. O divine elixir, Lord of viands, devoted to the divine elements, bestow upon us brilliant and abundant food. May you throw open the doors of the mid-region (for rains).2
(Cf. S. 1011; Ṛv IX.108.9)

580. O priests, pour forth and sprinkle the beverage all around, swift in action like a horse, the adorable, dispenser of rain, and active and speedy as light; may you squeeze out the juice of the plant, and then mix it with water and further strengthen it (with milk and curds).3
(Cf. S. 1394; Ṛv IX.108.7)

581. The enlightened priests have been milking from heaven, the exhilarating, thousand-streamed, the showerer of blessings and the bearer of all treasures.4
(Cf. Ṛv IX.108.11)

स सुन्वे यो वसूनां यो रायामानेता य इडानाम् । सोमो यः सुक्षितीनाम् ॥५॥
त्वꣳ ह्या३ङ्ग दैव्य पवमान जनिमानि द्युमत्तमः । अमृतत्वाय घोषयन् ॥६॥
एष स्य धारया सुतोऽव्या वारेभिः पवते मदिन्तमः । क्रीडन्नूर्मिरपामिव ॥७॥
य उस्रिया अपि या अन्तरश्मनि निर्गा अकृन्तदोजसा ।
अभि व्रजं तत्निषे गव्यमश्व्यं वर्मीव धृष्णवा रुज । ओ३म् वर्मीव धृष्णवा रुज ॥८॥

॥ इति षष्ठः प्रपाठकः ॥

॥ इति छन्द आर्चिकः ॥

582. Sa sunve yo vasūnām yo rāyām ānetā yaḥ iḍānām.
Somo yaḥ sukṣitīnām.5
(Cf. S. 1096; Ṛv IX.108.13)

583. Tvaṁ hyā3nga devya pavamān ajnimāni dhyumttmaḥ.
Amṛtatvāya ghoṣyan.6
(Cf. S, 938; Ṛv IX.108.3)

584. Eṣa sya dhārayā sutovyā vārebhiḥ pavate madintamaḥ.
Krīḍann ūrmir apām iva.7
(Cf. Ṛv IX.108.5)

585. Ya usriyā api yā antaraśmani nir gā akṛntad ojasā.
Abhi vrjam tatniṣe gavyam aśvyam varmīva dhṛṣṇavā ruja.
OM varmīva ḍhṛṣṇavā ruja.8
(Cf. Ṛv IX.108.6)

Here ends Khaṇḍa XI of Adhyāya V; and also ends Adhyāya V.

Here ends Daśati 9 and Ardha II of Prapāṭhaka VI and also ends Prapāṭhaka VI.

Here ends Pavamāna Kāṇḍa (Parva)

Here ends PURVĀRCIKA (Chanda Arcika)

582. The elixir has been effused, which is the bringer of treasures, the bringer of riches, the bringer of food and the bringer of fair home.[5]
(Cf. S. 1096; Ṛv IX.108.13)

583. O effusing divine love, brilliant and pure, you invoke and evoke all divine elements for the sake of their immortality.[6]
(Cf. S. 938; Ṛv IX.108.3)

584. This divine elixir when effused flows most exhilarating through the cosmic woollen fleecy sieve and sporting like a wave of water.[7]
(Cf. Ṛv IX.108.5)

585. O hero elixir, it is you who by your might have been extricating from the rock the quick-moving kine, abiding in the waters. You have spread out a pasturage for cattle and horses and like an armoured or mailed warrior, you have been ever slaying the wicked and cruel.[8]
(Cf. Ṛv IX.108.6)

Here ends Khaṇḍa XI of Adhyāya V; here also ends Adhyāya V.

Here also ends Daśati 9, and Ardha II of Prapāṭhaka VI.

Here also ends Prapāṭhaka VI.

HERE ENDS PAVAMĀNA KAṆḌA (PARVA)

Here also ends PŪRVĀRCIKA (Chanda Ārcika)

अथारण्यार्चिकः

(१) प्रथमा दशतिः

(१–९) नवर्चाया अस्या दशतेः (१) प्रथमाया ऋषो बार्हस्पत्यः शंयुः, (२) द्वितीयाया मैत्रावरुणो वसिष्ठः, (३–४) तृतीयाचतुर्थ्योराजीगर्तिः शुनःशेपः, (५) पञ्चम्या आङ्गिरसः कुत्सः, (६) षष्ठ्या आङ्गिरसो वृषः, (७–८) सप्तम्यष्टम्योराङ्गिरसोऽमहीयुः, (९) नवम्याश्चात्मा ऋषयः। (१–३, ६) प्रथमादितृचस्य षष्ठ्याश्चेन्द्रः, (४) चतुर्थ्या वरुणादित्यौ, (५) पञ्चम्याः सोममित्रवरुणादितिसिन्धुपृथिवीद्यावः, (७) सप्तम्या इन्द्रवरुणमरुतः, (८) अष्टम्याः सोमः, (९) नवम्याश्चात्मा देवताः। (१) प्रथमाया विराड्बृहती, (२, ४–५, ९) द्वितीयाचतुर्थीपञ्चमीनवमीनां त्रिष्टुप्, (३, ७–८) तृतीयासप्तम्यष्टमीनां गायत्री, (६) षष्ठ्याश्चैकपदा त्रिष्टुप् छन्दांसि॥

इन्द्र ज्येष्ठं न आ भरं ओजिष्ठं पुपुरि श्रवः।
यद्दिधृक्षेम वज्रहस्त रोदसी ओभे सुशिप्र पप्राः॥१॥

इन्द्रो राजा जगतश्चर्षणीनामधिक्षमा विश्वरूपं यदस्य।
ततो ददाति दाशुषे वसूनि चोदद्राध उपस्तुतं चिदर्वाक्॥२॥

यस्येदमा रजोयुजस्तुजे जने वनꣳ स्वः। इन्द्रस्य रन्त्यं बृहत्॥३॥

ĀRANYĀRCIKA

ĀRAṆYA KĀṆḌA (PARVA)

Adhyāya VI

Khaṇḍa I

Daśati 1

586. Indra jyeṣṭham na ā bhara ojiṣṭham pururi śravaḥ.
Yad didhṛkṣema vajrahasta rodasī obhe suśipra paprāḥ.1
(Cf. Ṛv VI.46.5; Av. XX.80.1)

587. Indro rājā jagataś carṣaṇinām adhikṣamā viśvarūpam yadasya.
Tato dadāti dāśuṣe vasūni codad rādha upastutam cid arvāk.2
(Cf. Ṛv VIII.27.3; Av. XIX.5.7)

588. Yasyedamā rajo yujas tuje jane vanaṁ svaḥ.
Indrasya rantyam bṛhat.3
(Cf. Av. VI.33.1)

ĀRANYĀRCIKA

ĀRAṆYA KĀṆḌA (PARVA)
Adhyāya VI

Khaṇḍa I

Daśati 1

586. O resplendent Lord, possessor of charming chin, wonderous, most invigorating, all powerful and wielder of bolt of justice, nourish us with the same vital power as you do to sustain the terrestrial and celestial worlds.₁
(Cf. Ṛv VI.46.5)

587. The resplendent is the sovereign of the earth and Lord of men. His is the entire wealth that exists on the earth, and he gives riches to the worshipper. May He, glorified by us, enrich us.₂
(Cf. Ṛv VII.27.3)

588. The gift of the resplendent Lord is superb and splendid. These bounteous gifts of glorious Lord are well reputed in the heaven and well spoken off amongst those people who generously give.₃
(Cf. Av. VI.33.1)

उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमꣳ श्रथाय ।
अथादित्य व्रते वयं तवानागसो अदितये स्याम ॥४॥
त्वया वयं पवमानेन सोम भरे कृतं वि चिनुयाम शश्वत् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥५॥
इमं वृषणं कृणुतैकमिन्माम् ॥६॥
स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः । वरिवोवित्परिस्रव ॥७॥
एना विश्वान्यर्य आ द्युम्नानि मानुषाणाम् । सिषासन्तो वनामहे ॥८॥

589. Ud uttamam varuṇa pāśam asmad av adhamam vi madhyamaṁ śrathāya.
Athā āditya vrate vayam tavānāgaso aditaye syāma.4
(Cf. Ṛv I.24.15; Yv. XII.12; Av. VII.83.3; XVIII.4.69)

590. Tvayā vayam pavamānena soma bhare kṛtam vi cinuyāma śaśvat.
Tanno mitro varuṇo māmahantām aditiḥ sindhuḥ pṛthivī uta dyauḥ.5
(Cf. Ṛv IX.97.58)

591. Imam vṛṣaṇam kṛṇutaikam in mām.6

592. Sa na indrāya yajyave varuṇāya marudbhyaḥ.
Varivovit parisrava.7
(Cf. S. 673; Ṛv IX.61.12; Yv. XXVI.17)

593. Enā viśvānyarya ā dyumnāni mānuṣāṇām.
Siṣāsanto vanāmahe.8
(Cf. S. 674; Ṛv IX.61.11; Yv. XXVI.18)

589. O venerable Lord, loosen the bonds that hold me, loosen the bonds upper, middle and lower. We shall obey your eternal laws, faithfully follow your command and thereby avoid sin.[4]
(Cf. Ṛv I.24.15)

590. O elixir, effused, pure and filtered, may we ever, with you as our ally, win glory and copious wealth in battle; so may the sun, the ocean, our mother Eternity, the lord of rivers, heaven and earth as well enrich us.[5]
(Cf. Ṛv IX.97.58)

591. O Nature's bounty! may you provide strength to this one, the showerer and also to me for rendering good to every-one.[6]

592. O divine elixir, the possessor of wealth as you are, may you flow from all sides from your resplendence, for our venerability and for our humanitarian character.[7]
(Cf. S. 673; Ṛv IX.61.12)

593. With the aid of this (divine elixir) alone, may we procure all the wealth that belongs to men, and enjoy it not alone but distributing it judiciously among ourselves.[8]
(Cf. S. 674; Ṛv IX.61.11)

अहमस्मि प्रथमजा ऋतस्य पूर्वं देवेभ्यो अमृतस्य नाम ।
यो मा ददाति स इदेवमावदहमन्नमन्नमदन्तमद्मि ॥९॥

594. Aham asmi prathamajā ṛtasya pūrvam devebhyo amṛtasya-nāma.
Yo mā dadāti sa idevamāvad aham annam adantam admi.9

(२) द्वितीया दशतिः

(१–७) सप्तर्चाया अस्या दशतेः (१) प्रथमाया ऋच आङ्गिरसः सुकक्षः, (२) द्वितीयाया आङ्गिरसः पवित्रः, (३–४) तृतीयाचतुर्थ्योर्वैश्वामित्रो मधुच्छन्दाः, (५) पञ्चम्या वासिष्ठः प्रथः, (६) षष्ठ्याः शौनको गृत्समदः, (७) सप्तम्याश्चाङ्गिरसौ नृमेधपुरुमेधावृषयः। (१, ३–४, ७) प्रथमातृतीयाचतुर्थीसप्तमीनामिन्द्रः, (२) द्वितीयायाः सोमपितरः, (५) पञ्चम्या धातृसवितृविष्णवः, (६) षष्ठ्याश्च वायुर्देवताः। (१, ३–४, ६) प्रथमातृतीयाचतुर्थीषष्ठीनां गायत्री, (२) द्वितीयाया जगती, (५) पञ्चम्यास्त्रिष्टुप्, (७) सप्तम्याश्चानुष्टुप् छन्दांसि ॥

त्वमेतदधारयः कृष्णासु रोहिणीषु च । परुष्णीषु रुशत्पयः ॥१॥
अरूरुचदुषसः पृश्निरग्रिय उक्षा मिमेति भुवनेषु वाजयुः ।
मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमादधुः ॥२॥
इन्द्र इद्धर्योः सचा सम्मिश्ल आ वचोयुजा । इन्द्रो वज्री हिरण्ययः ॥३॥

Khaṇḍa II

Daśati 2

595. Tvam etad adhārayaḥ kṛṣṇāsu rohiṇīṣu ca.
Paruṣṇīṣu ruśat payaḥ.1
(Cf. Ṛv VIII.93.13)

596. Arūrucad uṣasaḥ pṛśnir agriya ukṣā mimeti bhuvaneṣu vājayuḥ.
Māyāvino mamire asya māyayā nṛcakṣasaḥ pitaro garbham ādadhuḥ.2
(Cf. S. 877; Ṛv IX.83.3)

597. Indra iddharyoḥ sacā sammiśla ā vacoyujā.
Indro vajrī hiraṇyayaḥ.3
(Cf. S. 797; Ṛv I.7.2; Av. XX.38.5; 47.4; 70.8)

594. I, the Lord of food, am born much prior to other Nature's bounties. I am first born out of the immortal cosmic sacrifice, one who offers me gifts, verily, protects every one with generous heart. I, the Lord of sustaining food, consume that greedy person who alone tries to consume the entire food.[9]

Khaṇḍa II

Daśati 2

595. It is you who deposit white milk in the black and the red and in the cows with spotted skins.[1]
(Cf. Ṛv VIII.93.13)

596. The associate of dawn, and the sun (i.e. the divine elixir) shines forth; it sprinkles the dew drops to nourish the worlds with food and provisions; by its super-intellect, it supports the entire intelligentsia, the elders, the beholders of men; it supports the germ of entire activity in the world.[2]
(Cf. S .877; Ṛv IX.83.3)

597. The resplendent Lord, the wielder of adamantine justice, is the coordinator of all elements. At His command, all cosmic energies are harnessed to the richly-decorated aura and they come speedily to our help.[3]
(Cf. S. 797; Ṛv I.7.2)

इन्द्र वाजेषु नोव सहस्रप्रधनेषु च । उग्र उग्राभिरूतिभिः ॥४॥

प्रथश्च यस्य सप्रथश्च नामानुष्टुभस्य हविषो हविर्यत् ।
धातुर्द्युतानात्सवितुश्च विष्णो रथन्तरमा जभारा वसिष्ठः ॥५॥

नियुत्वान्वायवा गह्ययꣳ शुक्रो अयामि ते । गन्तासि सुन्वतो गृहम् ॥६॥

यज्जायथा अपूर्व्य मघवन्वृत्रहत्याय ।
तत्पृथिवीमप्रथयस्तदस्तभ्ना उतो दिवम् ॥७॥

598. Indra vājeṣu nova sahasrapradhaneṣu ca.
Ugra ugrābhir ūtibhiḥ.4
(Cf. S. 798; Ṛv I.7.4; Av. XX.70.10)

599. Prathaśca yasya saprathaśca nāmānuṣṭubhasya haviṣo havir yat.
Dhātur dyutānāt savituśca viṣṇo rathantaram ā jabhārā vasiṣṭhaḥ.5
(Cf. Ṛv X.181.1)

600. Niyutvān vāyavā gahyayaṁ śukro ayāmi te.
Gantāsi sunvato gṛham.6
(Cf. Ṛv II.41.2; Yv. XXVII.29)

601. Yaj jāyathā apūrvya maghavan vṛtra-hatyāya.
Tat pṛthivīm aprathayaṣ tad astabhnā uto divam.7
(Cf. S. 1429; Ṛv VIII.89.5)

598. O invincible resplendent Lord, may you, with insuperable defences, protect us in the struggle of hard life.[4]
(Cf. S. 798; Ṛv I.7.4)

599. The most celebrated sage first comprehends and then reveals the meaning of the *rathantara* chants in the *anuṣṭup* meters, recite in favour of the suns so well known under the names *dhātṛ* (the sustainer), *savitṛ* (the impeller) and *viṣṇu* (the all-pervading).[5]
(Cf. Ṛv X.181.1)

600. May you, O sense of touch, with all your awareness come. This graceful sensitivity of sweet taste is offered to you. You are fond of visiting those houses, where you get it.[6]
(Cf. Ṛv II.41.2)

601. O bounteous Lord, there has been a time, when none existed prior to you, and you were born as if, for the destruction of the shrouding darkness. At that time, you spread out far and wide this earth and brought the heavens, the luminaries, into existence.[7]
(Cf. S. 1429; Ṛv VIII.89.5)

(३) तृतीया दशतिः

(१-१३) त्रयोदशर्चाया अस्या दशतेः (१) प्रथमाया ऋषः परमेष्ठी प्रजापतिः, (२-३) द्वितीयातृतीययो राहूगणो गोतमः, (४) चतुर्थ्या वैश्वामित्रो मधुच्छन्दाः, (५) पञ्चम्या गौतमो वामदेवः, (६) षष्ठ्याः शौनको गृत्समदः, (७) सप्तम्या भारद्वाजी रात्रिः, (८) अष्टम्या बार्हस्पत्यो भरद्वाजः, (९) नवम्या. भारद्वाज ऋजिश्वा दौष्यन्तिर्भरतो वा, (१०) दशम्या मैत्रावरुणोऽगस्त्यः, (११) एकादश्या आङ्गिरसो हिरण्यस्तूपः, (१२-१३) द्वादशीत्रयोदश्योश्च गाथिनो विश्वामित्र ऋषयः। (१) प्रथमायाः प्रजापतिः, (२-३) द्वितीयातृतीययोः सोमः, (४, १२-१३) चतुर्थीद्वादशीत्रयोदशीनामग्निः, (५) पञ्चम्या गौः, (६) षष्ठ्या आपः, (७) सप्तम्या रात्रिरादित्यश्च, (८) अष्टम्या वैश्वानरः, (९-१०) नवमीदशम्योर्विश्वे देवाः, (११) एकादश्याश्चेन्द्रो देवताः। (१, ७) प्रथमासप्तम्योरनुष्टुप्, (२, ५-६, ९, ११-१३) द्वितीयापञ्चमीषष्ठीनवमीनामेकादश्यादितृचस्य च त्रिष्टुप्, (३) तृतीयाया विराट्, (४) चतुर्थ्या गायत्री, (८) अष्टम्या जगती, (१०) दशम्याश्च ज्योतिष्मती जगती छन्दांसि ॥

मयि वर्चो अथो यशोथो यज्ञस्य यत्पयः।
परमेष्ठी प्रजापतिर्दिवि द्यामिव दृꣳहतु ॥१॥

सं ते पयाꣳसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः।
आप्यायमानो अमृताय सोम दिवि श्रवाꣳस्युत्तमानि धिष्व ॥२॥

Khaṇḍa III

Daśati 3

602. Mayi varco atho yaśotho yajñasya yat payaḥ.
Parameṣṭhī prajāpatir divi dyām iva dṛṁhatu.[1]
(Cf. Av. VI.69.3)

603. Sam te payāṁsi samu yantu vājāḥ sam vṛṣṇyānyabhimātiṣāhaḥ.
Āpyāyamāno amṛtāya soma divi śṛvāṁsyuttamāni dhiṣva.[2]
(Cf. Ṛv I.91.18, Yv. X.12.113)

Khaṇḍa III

Daśati 3

602. O Lord of creation, the upholder of the supreme position, please enhance in me the divine glory, enhance in me fame and popularity, and also enhance the water or sustenance necessary for cosmic sacrifice, just as in the celestial region the luminaries (are multiplied and strengthened).[1]
(Cf. Av. VI.69.3)

603. O blissful Lord, may all sweet waters be treasured with you, and may powers, energies, and vanquishing vigour be united in you. For our immortality, may you provide us with heavenly spiritual nourishment.[2]
(Cf. Ṛv I.91.18)

त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः ।
त्वमातनोरुर्वा३न्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ॥३॥
अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारꣳ रत्नधातमम् ॥४॥
ते मन्वत प्रथमं नाम गोनां त्रिः सप्त परमं नाम जानन् ।
ता जानतीरभ्यनूषत क्षा आविर्भुवन्नरुणीर्यशसा गावः ॥५॥
समन्या यन्त्युपयन्त्यन्याः समानमूर्वं नद्यस्पृणन्ति ।
तमू शुचिꣳ शुचयो दीदिवाꣳसमपान्नपातमुप यन्त्यापः ॥६॥
आ प्रागाद्भद्रा युवतिरह्नः केतून्त्समीर्त्सति ।
अभूद्भद्रा निवेशनी विश्वस्य जगतो रात्री ॥७॥

604. Tvam imā oṣadhīḥ soma viśvās tvam apo ajanayas tvam gāḥ.
Tvam ātanor urva3ntarikṣam tvam jyotiṣā vi tamo vavartha.$_3$
(Cf. Ṛv I.91.22; Yv. XXXIV.12)

605. Agnimīḍe purohitam yajñasya devam ṛtvijam.
Hotāram ratnadhātamam.$_4$
(Cf. Ṛv I.1.1.)

606. Te manvata prathamam nạma gonām triḥ sapta paramam nāma jānan.
Tā jānatīr abhyanūṣata kṣa āvirbhuvann aruṇīr yaśasā gāvaḥ.$_5$
(Cf. Ṛv IV.1.16)

607. Samanyā yantupayantyanyāḥ samānam ūrvam nadyas pṛṇanti.
Tamū śuciṁ śucayo dīdivāṁ sam apān-napātam upa yantyāpaḥ.$_6$
(Cf. Ṛv II.35.3)

608. Ā prāgād bhadrā yuvatir ahnaḥ ketūnt samīrtsati.
Abhūd bhadrā niveśanī viśvasya jagato rātrī.$_7$

604. O blissful Lord, you have generated herbs, waters, and milch-kine; you have dispelled darkness with light, you have sustained and expanded the mid-regions.[3]
(Cf. Ṛv I.91.22)

605. We worship the adorable God, the one of fore-most position or of the first priority, the divine, the one who works through the eternal laws, and who feeds and sustains all that is divine and luminous.[4]
(Cf. Ṛv I.1.1)

606. They first have comprehended the name of the milch-cow (the divine speech). They found the mother's three sets of seven noblest terms (21 metres of the Vedas). Then they glorified the conscious dawns (divine light), and the purple dawn appeared with the radiance of the effulgent sun.[5]
(Cf. Ṛv IV.1.16)

607. Some waters collect together, other's join them. As rivers, they flow together to a common reservoir (ocean). The pure waters have gathered round the hydrodynamic power, pure and shining.[6]
(Cf. Ṛv II.35.3)

608. Here arrives the blessed maiden with a desire to save us from the scorching rays of sun. She is the giver of rest to the entire universe. May this night be source of peace and happiness to us.[7]

प्रक्षस्य वृष्णो अरुषस्य नू महः प्र नो वचो विदथा जातवेदसे ।
वैश्वानराय मतिर्नव्यसे शुचिः सोम इव पवते चारुरग्नये ॥८॥

विश्वे देवा मम शृण्वन्तु यज्ञमुभे रोदसी अपां नपाच्च मन्म ।
मा वो वचाꣳसि परिचक्ष्याणि वोचꣳ सुम्नेष्विद्वो अन्तमा मदेम ॥९॥

यशो मा द्यावापृथिवी यशो मेन्द्राबृहस्पती ।
यशो भगस्य विन्दतु यशो मा प्रतिमुच्यताम् ।
यशस्व्या३स्याः सꣳ सदोहं प्रवदिता स्याम् ॥१०॥

इन्द्रस्य नु वीर्याणि प्रवोचं यानि चकार प्रथमानि वज्री ।
अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत्पर्वतानाम् ॥११॥

609. Prakṣasya vṛṣṇo aruṣasya nū mahaḥ pra no vaco vidathā jātavedase.
Vaiśvānarāya matir navyase śuciḥ soma iva pavate cārur agnaye.8
(Cf. Ṛv VI.8.1)

610. Viśve devā mama sṛṇvantu yajyīam ubhe rodasī apām napāc ca manma.
Mā vo vacāṁsi paricakṣyāṇi vocaṁ sumneṣvid vo antamā madema.9
(Cf, Ṛv VI.52.14)

611. Yaśo mā dyāya -pṛthivī yaśo mendra-bṛhaspatī.
Yaśo bhagasya vindatu yaśo mā pratimucyatām.
Yaśasvyā3syḥ saṁ sadoham pravaditā syām.10

612. Indrasya nu vīryāṇi pravocam yāni cakāra prathamāni vajrī.
Ahann ahim anvapas tatarda pra vakṣaṇā abhinat parvatānām.11
(Cf. Ṛv I.32.1; Av. II.5.5)

609. I commemorate promptly at the holy congregation the might of the all-pervading cosmic fire, all-knowing, the showerer, and the radiant; ever-fresh, pure, and graceful hymns flow from me for this universal leader, in the same way, as the herbal juice flows from the filter.8
(Cf. Ṛv VI.8.1)

610. May all the divine powers, and both heaven and earth and the fire-divine, the grandson of water, hear our songs; may we not utter such words as you may disregard. Let us, closely allied with you, rejoice in bliss.9
(Cf. Ṛv VI.52.14)

611. May my fame spread in regions from earth to heaven. May I be a recepient of reputation from men of learning and men of power. May I be renowned amongst the people of wealth. May I be never deprived of my glory. May I have good name amongst the members of assembly and may I be known for my eloquence.10

612. May I acclaim the valorous deeds of the resplendent soul (the lower self), which he has achieved; he has cloven the cloud of blind and dark impulses; and cast out the evil thoughts; he has broken a way for hte torrents of wisdom through obstacles.11
(Cf. Ṛv I.32.1)

अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन् ।
त्रिधातुरर्को रजसो विमानोजस्रं ज्योतिर्हविरस्मि सर्वम् ॥१२॥
पात्यग्निर्विपो अग्रं पदं वेः पाति यह्वश्चरण९ सूर्यस्य ।
पाति नाभा सप्तशीर्षाणमग्निः पाति देवानामुपमादमृष्वः ॥१३॥

613. Agnir asmi janmanā jātavedā ghṛtam me cakṣur amṛtam ma āsan.
Tridhātur arko rajaso vimānojasram jyotir havir asmi sarvam.12
(Cf. Ṛv III.26.7; Yv. XVIII.66)

614. Pātyagnir vipo agram padam veḥ pāti yahvaś caraṇaṁ sūryasya.
Pāti nābhā sapta-śīrṣaṇam agniḥ pāti devānām upamādam ṛṣvaḥ.13
(Cf. Ṛv III.5.5)

(४) चतुर्थी दशतिः

(१-१२) द्वादशर्चाया अस्या दशतेः (१) प्रथमाया ऋचोऽग्निः, (२) द्वितीयाया ऋतवः, (३-७) तृतीयादिपञ्चानामाङ्गिरसः काश्यपो वा नारायणः, (८) अष्टम्याः पृथिव्यन्तरिक्षद्यावो लोकाः, (९) नवम्या आङ्गिरस ऋष्यः, (१०) दशम्याः सर्वा दिशः, (११-१२) एकादशीद्वादश्योश्च मारीचः कश्यप ऋषयः । (१) प्रथमाया अग्निः, (२) द्वितीयाया ऋतवः, (३-७) तृतीयादिपञ्चानां पुरुषः, (८) अष्टम्या द्यावापृथिवी, (९, ११) नवम्येकादश्योरिन्द्रः, (१०) दशम्या विश्वे देवाः, (१२) द्वादश्याश्च गौर्देवताः । (१) प्रथमायाः पङ्क्तिः, (२) द्वितीयाया विराड्बृहती, (३-७, ९-१०) तृतीयादिपञ्चानां नवमीदशम्योश्चानुष्टुप्, (८) अष्टम्या ज्योतिष्मती जगती, (११-१२) एकादशीद्वादश्योश्च त्रिष्टुप् छन्दांसि ॥

भ्राजन्त्यग्ने समिधान दीदिवो जिह्वा चरत्यन्तरासनि ।
स त्वं नो अग्ने पयसा वसुविद्रयिं वर्चो दृशेदाः ॥१॥

Khaṇḍa IV

Daśati 4

615. Bhrājantyagne samidhāna dīdivo jihvā caraty antar āsani.
Sa tvam no agne payasā vasuvid rayim varco dṛśedāḥ.1

613. I, the fire-divine, have since my first manifestation, been endowed with the knowledge of all that exists. The butter is my eye and the embrosia my mouth. I am the living breath of three-fold universe. The measurer of the firmament, and the exhaustless warmth. I am also the burnt oblation.[12]
(Cf. Ṛv III.26.7)

614. The graceful fire divine guards the lovely extensive summit of the moving earth; mighty, he guards the daily course of the sun. At the navel of the earth (i.e. between heaven and earth), he guards the seven-fold vital principles and sublime deeds of pious devotees.[13]
(Cf. Ṛv III.5.5)

Khaṇḍa IV

Daśati 4

615. O kindled fire-divine, your tongue — the flames — blazing within your mouth consumes the oblation. O fire divine, rich in wealth, may you enrich us with the milk of affluence, and provide us with your well known glory.[1]

वसन्त इन्नु रन्त्यो ग्रीष्म इन्नु रन्त्यः ।
वर्षाण्यनु शरदो हेमन्तः शिशिर इन्नु रन्त्यः ॥२॥

सहस्रशीर्षाः पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिँ सर्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम् ॥३॥

त्रिपादूर्ध्वं उदैत्पुरुषः पादोस्येहाभवत्पुनः ।
तथा विष्वङ् व्यक्रामदशनानशने अभि ॥४॥

पुरुष एवेदँ सर्वं यद्भूतं यच्च भाव्यम् ।
पादोस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि ॥५॥

616. **Vasanta innu rantyo grīṣma innu rantyaḥ.**
Varṣāṇyanu śarado hemantaḥ śiśira innu rantyaḥ.2

617. **Sahasra -śīrṣāḥ puruṣaḥ sahasrākṣaḥ sahasrapāt.**
Sa bhūmiṁ sarvato vṛtvāatyatiṣṭhad daśāngulam.3
(Cf. Ṛv X.90.1; Yv. XXXI.1; Av. XIX.6.1)

618. **Tripād-ūrdhavam udait puruṣaḥ pādosyehābhavat punaḥ.**
Tathā viṣvaṅ vyakrāmad aśanānaśane abhi.4
(Cf. Ṛv X.90.4; Yv. XXXI.4; Av. XIX.6.2)

619. **Puruṣa evedaṁ sarvam yad bhūtam yacca bhāvyam.**
Pādosya sarva bhutāni tripād asyāmṛtam divi.5
(Cf. Ṛv X.90.2; Yv. XXXI.2. Av. XIX.6.4)

616. Charming and sweet is the Vasanta (Spring) season. Grīṣma or the summer season is also equally charming and sweet, and so is the Varṣā season or rains. Śarada or the autumn season is also charming and sweet. Hemanta or winter season and also Śiśira season of the extreme chilly cold are also equally charming and sweet.₂

Season	Vedic Months	Months after constellations
Vasanta	Madhu-Mādhava	Caitra-Vaiśākha
Grīṣma	Śukra-Śuci	Jyeṣṭha-Āṣāḍha
Varṣā	Nabha-Nabhasya	Śrāvaṇa-Bhādrapada
Śarada	Iṣa-Ūrja	Aśvina-Karttika
Hemanta	Saha-Sahasya	Mārgaśīrṣa-Pauṣa
Śiśira	Tapa-Tapasya	Māgha-Phālguna

617. Cosmic Man has thousands of heads, thousands of eyes, and thousands of feet. Enveloping this whole universe, He exceeds by ten finger-breadths all round.[3]
(Cf. Ṛv X.90.1)

618. Three-fourths of that Cosmic Man rises above the heaven. The one-fourth is still here on the earth. Then He starts spreading in all directions towards all that eats not.[4]
(Cf. Ṛv X.90.4)

619. Whatever all this is, whatever has been in the past and whatever is going to be in future, is, verily, the Cosmic Person. In His one-fourth (or one quarter) is the entire creation, and His three-fourth is void or the unoccupied space, eternal and celestial.[5]
(Cf. Ṛv X.90.2)

तावानस्य महिमा ततो ज्यायाꣳश्च पूरुषः ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥६॥
ततो विराडजायत विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥७॥
मन्ये वां द्यावापृथिवी सुभोजसौ ये अप्रथेथाममितमभि योजनम् ।
द्यावापृथिवी भवतꣳ स्योने ते नो मुञ्चतमꣳहसः ॥८॥
हरी त इन्द्र श्मश्रूण्युतो ते हरितौ हरी ।
तं त्वा स्तुवन्ति कवयः परुषासो वनर्गवः ॥९॥
यद्वर्चो हिरण्यस्य यद्वा वर्चो गवामुत ।
सत्यस्य ब्रह्मणो वर्चस्तेन मा सꣳसृजामसि ॥१०॥

620. Tāvān asya mahimā tato jyāyām̐śca pūruṣaḥ.
Utāmṛttvasyeśāno yad annenātirohati.6
(Cf. Ṛv X.90.3-2; Yv. XXXI.3-2)

621. Tato virād ajāyata virājo adhi pūruṣaḥ.
Sa jāto atyaricyata paścād bhūmim atho puraḥ.7
(Cf. Ṛv X.90.5; Yv. XXXI.5; Av. XIX.6.9)

622. Manye vām dyāvā-pṛthivī subhojasau ye aprathethām amitam abhi yojanam.
Dyāvā-pṛthivī bhavatam̐ syone te no muñcatam am̐hasaḥ.8
(Cf. Av. IV.26.1)

623. Harī ta indra śmaśrū ṇyuto te haritau harī.
Tam tvā stuvanti kavayaḥ paruṣāso vanar gavaḥ.9

624. Yad varco hiraṇyasya yad vā varco gavāmuta.
Satyasya brahmaṇo varcas tena mā sam̐sṛjām asi.10

620. That much (as is the basis of the past and of the future) is his particular glory. But verily, the Cosmic Man is much greater than that (in all parameters). Whatever is born of food and beyond that of immortal eternity, He is the supreme master.[6]
(Cf. Ṛv X.9.3-2)

621. From that Cosmic Man, super-luminiscence is born and from super-luminscence again the creative factor is born. Expanding, He exceeds the earth backward and forward both.[7]
(Cf. Ṛv X.90.5)

622. O regions of heaven and earth, I take both of you to be the right sustainer of all of us. You are extended to unmeasured dimensions all around us. May you, heaven and earth, give us protection against evils and sins, and be favourable to us.[8]
(Cf. Av. IV.26.1)

623. O Sun, the creation of the resplendent Lord, your ray-like moustaches are the suckers of water. Your centripetal and centrifugal forces (the two yoked horses) are used in establishing a equilibrium. Men of wisdom, with their divine words of praises invoke you.[9]

624. The glory and glamour of gold-like creation as well as the glory of kine, and the eternal truth of Divine Supreme, — may all of us be blessed with them.[10]

सहस्तन्न इन्द्र दद्ध्योज ईशे ह्यस्य महतो विरप्शिन् ।
क्रतुं न नृम्णꣳ स्थविरं च वाजं वृत्रेषु शत्रून्त्सुहना कृधी नः ॥११॥
सहर्षभाः सहवत्सा उदेत विश्वा रूपाणि बिभ्रतीर्द्व्यूध्नीः ।
उरुः पृथुरयं वो अस्तु लोक इमा आपः सुप्रपाणा इह स्त ॥१२॥

625. **Sahas tan na indra daddhy oja īśe hy asya mahato virapśin.**
Kratum na nṛmṇaṁ sthaviram ca vājaṁ vṛtreṣu śatrūnt suhanā kṛdhī naḥ. 11

626. **Saharṣabhāḥ sahavatsā udeta viśvā rūpāṇi bibhratīr dvyūdhnīḥ.**
Uruḥ pṛthur ayam vo astu loka imā āpaḥ suprapāṇā iha sta. 12

(५) पञ्चमी दशतिः

(१-१४) चतुर्दशर्चात्मिकाया अस्या दशतेः (१) प्रथमाया ऋचः आङ्गिरसः शतं वैखानसाः, (२) द्वितीयायाः सौर्यो विभ्राट्, (३) तृतीयाया आङ्गिरसः कुत्सः, (४-६) चतुर्थ्यादितृचस्य सार्पराज्ञी वा कद्रूपेयः सर्पोऽर्बुदो वा, (७-१४) सप्तम्याद्यष्टानाञ्च काण्वः प्रस्कण्व ऋषयः। (१) प्रथमाया अग्निः, (२-३, ७-१४ द्वितीया-तृतीययोः सप्तम्याद्यष्टानाञ्च सूर्यः, (४-६) चतुर्थ्यादितृचस्य वाग्वा देवताः। (१, ४-१४) प्रथमाया-चतुर्थ्याद्येकादशानाञ्च गायत्री, (२) द्वितीयाया जगती, (३) तृतीयायाश्च त्रिष्टुप् छन्दांसि ॥

अग्न आयूꣳषि पवस आसुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनाम् ॥१॥

Khaṇḍa V

Daśati 5

627. **Agna āyuūṁṣi pavasa āsuvorjam iṣam ca naḥ.**
Āre bādhasva ducchunāṃ pavasa āsuvorjam iṣam ca naḥ.
Āre bādhasva ducchunām. 1
(Cf. S. 1464; 1518; Ṛv IX.66.19; Yv. XIX.38; XXXV.16)

625. O resplendent Lord, the possesser of immense glory, may you give us that endurance and valour, of which you are a supreme possessor. May we for our selfless public services get from you wealth and sufficient strength and may we succeed in defeating our enemy in our fights against them.[11]

626. O cows (or divine speech), you are the possessor of all the forms; you yield us milk morning and evening; you are impregnated by bulls or showerers of bliss. You are loved by calves. May you grow more and more prosperous. This region of extensive lengths and breadths, and the waters be favourable to us. May this life of ours be a blessing.[12]

Khaṇḍa V

Daśati 5

627. O adorable Lord, you support our lives; you send us fuel and food. May you drive away — far from us — the evil instincts.[1]
(Cf. S. 1464; 1518; Ṛv IX.66.19)

विभ्राड्बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम् ।
वातजूतो यो अभिरक्षति त्मना प्रजाः पिपर्ति बहुधा वि राजति ॥२॥
चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अन्तरिक्ष९ सूर्य आत्मा जगतस्तस्थुषश्च ॥३॥
आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरं च प्रयन्त्स्वः ॥४॥
अन्तश्चरति रोचनास्य प्राणादपानती । व्यख्यन्महिषो दिवम् ॥५॥
त्रि९शद्धाम वि राजति वाक्पतङ्गाय धीयते । प्रति वस्तोरह द्युभिः ॥६॥

628. Vibhrāḍ bṛhat pibatu somyam madhv āyur dadhad yajñapatāv-avihrutam.
Vātajūto yo abhirakṣati tmanā prajāḥ piparti bahudhā vi rājati.2
(Cf. S. 1453; Ṛv X.170.1; Yv. XXXIII.30)

629. Citram devānām udagād anīkam cakṣur mitrasya varuṇasyāgneḥ.
Āprā dyāvā-pṛthivī antarikṣam sūrya ātmā jagata stasthuṣaś ca.3
(Cf. Ṛv I.115.1; Yv. VII.42; XIII.46; Av. XIII.2.35; XX.107.14)

630. Āyam gauḥ pṛśnir akramīd asadan mātaram puraḥ.
Pitaram ca prayant svaḥ.4
(Cf. S. 1376; Ṛv X.189.1; Yv. III.6; Av. VI.31.1; XX.48.4)

631. Antaś carati rocanāsya prāṇād apānatī.
Vyakhyan mahiṣo divam.5
(Cf. S. 1377; Ṛv X.189.2; Yv. III.7; Av. VI.31.2; XX.48.5)

632. Triṁśad dhāma vi rājati vāk patangāya dhīyate.
Prati vastora-ha dyubhiḥ.6
(Cf. S. 1378; Ṛv X.189.3; Yv. III.8; Av. VI.31.3; XX.48.6)

628. Let the radiant sun abundantly draw sweet herbal juices, bestowing unbroken life upon the house-holders, the institutors of sacrifices. Impelled by the wind, the sun protects his people of his own accord, nourishes them and shines over many a land.
(Cf. S. 1453; Ṛv X.170.1)

629. Yonder has arisen, above the horizon, with wonderful divine effulgence the Eye of our light, life and energy. He, that Eye, the Sun, has filled the celestial region, the earth and the interspace with his glory. The Sun is the soul of all that moves or is stationary.[3]
(Cf. Ṛv I.115.1)

630. The earth moves (on her axis) round and round in the space (with the sun stationed in the centre). The earth is the mother, the heaven our father. She moves around the sun in space, carrying waters on her front.[4]
(Cf. S. 1376; Ṛv X.189.1)

631. The brilliant radiance of the sun penetrates internally in the cosmic body, drawing the air down, after having taken it up; like the in-breath and out-breath (in a living body). The sun illumines the entire celestial space.[5]
(Cf. S. 1377; Ṛv X.189.2)

632. Praises in divine words are showered upon this divine bird — the sun. He rules supreme through thirty stations (30 ghaṭikās) of the day and night.[6]
(Cf. S. 1378; Ṛv X.189.3)

अप त्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः । सूराय विश्वचक्षसे ॥७॥
अदृश्रन्नस्य केतवो वि रश्मयो जनाꣳ अनु । भ्राजन्तो अग्नयो यथा ॥८॥
तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य । विश्वमाभासि रोचनम् ॥९॥
प्रत्यङ् देवानां विशः प्रत्यङ्ङुदेषि मानुषान् । प्रत्यङ् विश्वꣳ स्वर्दृशे ॥१०॥
येना पावक चक्षसा भुरण्यन्तं जनाꣳ अनु । त्वं वरुण पश्यसि ॥११॥
उद्द्यामेषि रजः पृथ्वहा मिमानो अक्तुभिः । पश्यञ्जन्मानि सूर्य ॥१२॥

633. Apa tye tāyavo yathā nakṣatrā yanty aktubhiḥ.
Sūrāya viśvacakṣase.7
(Cf. Ṛv I.50.2; Av. XIII.2.17; XX.47.14)

634. Adṛsrann asya ketavo vi raśmayo janāṁ anu.
Bhrājanto agnayo yathā.8
(Cf. Ṛv I.50.3; Yv. VIII.40; Av. XIII.2.18; XX.47.15)

635. Taraṇir viśva-darśato jyotiṣkṛd asi sūrya.
Viśvam ābhāsi rocanam.9
(Cf. Ṛv I.50.4; Yv. XXXIII.36; Av. XIII.2.19; XX.47.16)

636. Pratyaṅ devānām viśaḥ pratyaṅṅ udeṣi mānuśān.
Pratyaṅ viśvam svar dṛśe.10
(Cf. Ṛv I.50.5; Av. XIII.2.20; XX.47.17)

637. Yenā pāvaka cakṣasā bhuraṇyantam janāṁ anu.
Tvam varuṇa paśyasi.11
(Cf. Ṛv I.50.6; Yv. XXXIII.32; Av. XIII.2.21; XX.47.18)

638. Ud dyāmeṣi rajaḥ pṛthvahā mimāno aktubhiḥ.
Pasyañ janmāni sūrya.12
(Cf. Ṛv I.50.7; Av. XIII.2.22; XX.47.19)

633. In his supreme transcendental glow, all other transient lights fade away, like thieves.[7]
(Cf. Ṛv I.50.2)

634. His illuminating rays, shining like blazing fires, are seen afar, refulgent over the world of men.[8]
(Cf. Ṛv I.50.3)

635. O self-radiant God, you are the supreme light that outstrips all in speed, and it is your spiritual radiance that awakens each one of us, and shines through the entire firmament.[9]
(Cf. Ṛv I.50.4)

636. O God, you rise above to vitalize the physical forces, and you go deep into the inner realm to shine through the hearts of mankind. You command all the regions of the celestial and spiritual world.[10]
(Cf. Ṛv I.50.5)

637. It is your divine light that purifies our soul, and keeps us away from evil thoughts and malicious actions.[11]
(Cf. Ṛv I.50.6)

638. It is your divine light that discriminates between light and darkness for the benefit of all creatures that have birth.[12]
(Cf. Ṛv I.50.7)

अयुक्त सप्त शुन्ध्युवः सूरो रथस्य नप्त्यः । ताभिर्याति स्वयुक्तिभिः ॥१३॥
सप्त त्वा हरितो रथे वहन्ति देव सूर्य । शोचिष्केशं विचक्षण ॥१४॥

॥ इत्यारण्यार्चिकः ॥

639. Ayukta sapta śundhyuvaḥ sūro rathasya naptryaḥ.
Tābhir yāti svayuktibhiḥ.13
(Cf. Ṛv I.50.9; Av. XIII.2.24; XX.47.21)

640. Sapta tvā harito rathe vahanti deva sūrya.
Śociṣkeśam vicakṣaṇa.14
(Cf. Ṛv I.50.8; Av. XIII.2.23; XX.47.20)

Here ends Khanda V of Adhyāya VI.
Here also ends Āraṇya Kāṇḍa (Parva),
also known as *Āraṇyārcika*

अथ महानाम्न्यार्चिकः

(१-१०) दशर्चाया अस्या दशतेरिन्द्रो वा प्रजापतिर्वा विष्णुर्वा विश्वामित्रो वा ऋषिः । (१-९) प्रथमादिनवानामिन्द्रः, (१०) दशम्याश्च लिङ्गोक्ता देवताः । (१-९) प्रथमादिनवानां विराट्, (१०) दशम्याश्च गायत्री पदपङ्क्तिर्वा छन्दसी ॥

विदा मघवन् विदा गातुमनुशꣳसिषो दिशः ।
शिक्षा शचीनां पते पूर्वीणां पुरूवसो ॥१॥

आभिष्ट्वमभिष्टिभिः स्वा३न्नाꣳशुः ।
प्रचेतन प्रचेतयेन्द्र द्युम्नाय न इषे ॥२॥

MAHĀNĀMNYĀRCIKA

641. Vidā maghavan vidā gatum anusaṁsiṣo diśaḥ.
Śikṣā śacīnām pate pūrvīṇām purūvaso.1

642. Ābhiṣ ṭvam abhiṣṭibhiḥ svā3rnn āṁśuḥ.
Pracetana pracetayendra dyumnāya na iṣe.2

639. The self-radiant one operates through these harnessed sevens (five organs of senses and mind and intellect on the spiritual plane), — never failing and ever purifying, and thus safely draws the chariot of inner cosmos.[13] (Cf. Ṛv I.50.9)

640. O, the one of refulgent hairs (self-radiant), through your divine spectrum (of seven horses) harnessed to your chariot, you guide all men.[14] (Cf. Ṛv I.50.8)

Here ends Khaṇḍa V of Adhyāya VI
HERE ENDS ĀRAṆYA KĀṆḌA (PARVA)
OR
ENDS HERE THE ĀRNAYĀRCIKA

641. O affluent Lord, you know everything; you know the place and direction, where the devotee or he house-holder aspires to go. Please direct him towards that end. O eternal Lord of our intellects; O possessor of immense wealth![1]

642. Pleased with these prayers, kindly award prosperity and other blessings. You are very much like the sun in glory and omnipresence. O Supreme embodiment of conscientiousness, give me sufficient awareness (to avoid evils), O Lord of resplendence; please give us glory and food.[2]

एवा हि शक्रो राये वाजाय वज्रिवः ।
शविष्ठ वज्रिन्नृञ्जसे मꣳहिष्ठ वज्रिन्नृञ्जस
आ याहि पिब मत्स्व ॥३॥
विदा राये सुवीर्यं भुवो वाजानां पतिर्वशाꣳ अनु ।
मꣳहिष्ठ वज्रिन्नृञ्जसे यः शविष्ठः शूराणाम् ॥४॥
यो मꣳहिष्ठो मघोनामꣳशुर्न शोचिः ।
चिकित्वो अभि नो नयेन्द्रो विदे तमु स्तुहि ॥५॥
ईशे हि शक्रस्तमूतये हवामहे जेतारमपराजितम् ।
स नः स्वर्षदति द्विषः क्रतुश्छन्द ऋतं बृहत् ॥६॥
इन्द्रं धनस्य सातये हवामहे जेतारमपराजितम् ।
स नः स्वर्षदति द्विषः स नः स्वर्षदति द्विषः ॥७॥

643. Evā hi śakro rāye vājāya vajrivaḥ.
Śaviṣṭha vajrinn ṛñjase maṁhiṣṭha vajrinn ṛñjasa ā yāhi piba matsva.3

644. Vidā rāye suvīryam bhuvo vājānām patir vaśaṁ anu.
Maṁhiṣṭha vajrinn ṛñjase yaḥ śaviṣṭhaḥ śūrāṇām.4

645. Yo maṁhiṣṭho maghonām aṁśurnna śociḥ.
Cikitvo abhi no nayendro vide tamu stuhi.5

646. Iśe hi śakras tam ūtaye havāmahe jetāram aparājitam.
Sa naḥ svarṣad ati dviṣaḥ kratus chanda ṛtam bṛhat.6

647. Indram dhanasya sātaye havāmahe jetāram aparājitam.
Sa naḥ svar ṣadati dviṣaḥ sa naḥ svar ṣadati dviṣaḥ.7

643. O Lord, you verily, have a great potential of accomplishment. O, the holder of adamantine justice, may you be pleased to give us wealth and capacity to work. O Lord, with supreme force and strength, O Lord of justice, may we please you and get favours from you. Please come to us, drink the immortal elixir and be exhilarated.$_3$

644. O Lord of defence forces, be pleased to have us under your defence; may we acquire wealth, vigour and prosperity. O Lord of supreme authority and the possessor of adamantine weapons, you are amenable to our requests and prayers, you are exemplary among brave heroes.$_4$

645. You, O Lord, are well known for your affluent awards. You illume like the sun. Lead us safe across all quarters. You are ever available to us for help. We offer prayers to you, our resplendent Lord.$_5$

646. You are the potentiality source for securing supremacy everywhere. We invoke you for our protection; you are the one who is never defeated or vanquished, and is always a victor; may He, our Lord, over-ruling all our enemies, lead us to success and favours. He is the protector of selfless acts and service, the divine speech (metres), and the eternal law of supreme significance.$_6$

647. We, the devotees, invoke the Lord of resplendence for the sake of wealth and affluence; our Lord is never defeated and is ever a victor, may He crush evil and evil doer both.$_7$

पूर्वस्य यत्ते अद्रिवोऽंशुर्मदाय ।
सुम्न आ धेहि नो वसो पूर्तिः शविष्ठ शस्यते ।
वशी हि शक्रो नूनं तन्नव्यऽ संन्यसे ॥८॥
प्रभो जनस्य वृत्रहन्त्समर्येषु ब्रवावहै ।
शूरो यो गोषु गच्छति सखा सुशेवो अद्वयुः ॥९॥
एवा ह्ये३व । एवा ह्यग्ने । एवा हीन्द्र ।
एवा हि पूषन् । एवा हि देवाः । ॐ एवाहि देवाः ॥१०॥

॥ इति महानाम्न्यार्चिकः ॥

648. Pūrvasya yat te adrivo aṁśur madāya.
Sumna ā dhehi no vaso purtiḥ śaviṣṭha śasyate.
Vasī hi śakro nūnam tan navyam samnyase.8

649. Probho janasya vṛtrahant samaryeṣu bravāvahai.
Śūro yo goṣu gacchati sakhā suśevo advayuḥ.9

Pañcapurīṣapadāni

650. Evā hye3va. Evā hyagne. Evā hīndra.
Evā hi pūṣan. Evā hi devāḥ. OM EVĀ HI DEVĀḤ.10

Kāṇḍa	No. of Ṛks
Āgneya	114
Aindra	352
Pāvamāna	119
Āraṇya	55
Mahānāmnyārcika	10
Total	650

HERE ENDS MAHĀNĀMNYĀRCIKA

648. O Lord, the possessor of adamantine weapons, we are your devotee from the very early times, may we have the divine enlightenment from your rays of wisdom — an enlightenment which is so exhilarating. Please take us over in your direct favours.[8]

O mighty one, your favours and privileges are so well evoked, you have the Supreme potential to work and accomplish; you are our sole master and guardian.

Verily, I would be pleased to renunciate the new worldly pleasures.

649. May we, the renouncers, together have a dialogue among us.

May we talk about the Supreme Self, who is wise, everybody's friend, and an abode of divine bliss; the only one, without a second, who moves singly in all the heavenly bodies. (Let us talk about Him and be wise).[9]

650. This verse includes the final five aphorisms known as the *PURĪṢA PĀDA*.
(i) This and thus for you alone,
(ii) O Agni, the adorable Lord, thus for you also,
(iii) O Indra, the resplendent Lord, thus for you too,
(iv) O Pūṣan, Lord of sustenance, thus for you too,
(v) O devāḥ, O all Bounties, thus for you also.[10]

HERE ENDS MAHĀNĀMNYĀRCIKA.

Summry
Pūrvārcika: Chanda Ārcika

Classification I in Adhyāyas and Khaṇḍas		Classification II in Prapāṭhakas, Ardhas and Daśatis	
Adhyāya I		**Prapāṭhaka I: Ardha I**	
Khaṇḍa I	1-10	Daśati 1	1-10
Khaṇḍa II	11-20	Daśati 2	11-20
Khaṇḍa III	21-34	Daśati 3	21-34
Khaṇḍa IV	35-44	Daśati 4	35-44
Khaṇḍa V	45-54	Daśati 5	45-54
Khaṇḍa VI	55-62		
Khaṇḍa VII	63-72	**Prapāṭhaka I: Ardha II**	
Khaṇḍa VIII	73-80	Daśati 6	55-62
Khaṇḍa IX	81-90	Daśati 7	63-72
Khaṇḍa X	91-96	Daśati 8	73-80
Khaṇḍa XI	97-106	Daśati 9	81-90
Khaṇḍa XII	107-114	Daśati 10	91-96
Adhyāya II		**Prapāṭhaka II: Ardha I**	
Khaṇḍa I	115-124	Daśati 1	97-106
Khaṇḍa II	125-134	Daśati 2	107-114
Khaṇḍa III	135-144	Daśati 3	115-124
Khaṇḍa IV	145-154	Daśati 4	125-134
Khaṇḍa V	155-164	Daśati 5	135-144
Khaṇḍa VI	165-174		
Khaṇḍa VII	175-184	**Prapāṭhaka II: Ardha II**	
Khaṇḍa VIII	185-193	Daśati 6	145-154
Khaṇḍa IX	194-203	Daśati 7	155-164
Khaṇḍa X	204-213	Daśati 8	165-174
Khaṇḍa XI	214-222	Daśati 9	175-184
Khaṇḍa XII	223-232	Daśati 10	185-193

Classification I in Adhyāyas and Khaṇḍas

Adhyāya III	
Khaṇḍa I	233-242
Khaṇḍa II	243-252
Khaṇḍa III	253-262
Khaṇḍa IV	263-272
Khaṇḍa V	273-282
Khaṇḍa VI	283-292
Khaṇḍa VII	293-302
Khaṇḍa VIII	303-312
Khaṇḍa IX	313-322
Khaṇḍa X	323-331
Khaṇḍa XI	332-341
Khaṇḍa XII	342-351

Adhyāya IV	
Khaṇḍa I	352-359
Khaṇḍa II	360-369
Khaṇḍa III	370-380
Khaṇḍa IV	381-390
Khaṇḍa V	391-398
Khaṇḍa VI	399-408
Khaṇḍa VII	409-418
Khaṇḍa VIII	419-426
Khaṇḍa IX	427-436
Khaṇḍa X	437-446
Khaṇḍa XI	447-456
Khaṇḍa XII	457-466

Classification II in Prapāṭhakas, Ardhas and Daśatis

Prapāṭhaka III: Ardha I	
Daśati 1	194-203
Daśati 2	204-213
Daśati 3	214-222
Daśati 4	223-232
Daśati 5	233-242

Prapāṭhaka III: Ardha II	
Daśati 6	243-252
Daśati 7	253-262
Daśati 8	263-272
Daśati 9	273-282
Daśati 10	283-292

Prapāṭhaka IV: Ardha I	
Daśati 1	293-302
Daśati 2	303-312
Daśati 3	313-322
Daśati 4	323-331
Daśati 5	332-341

Prapāṭhaka IV: Ardha II	
Daśati 6	342-351
Daśati 7	352-359
Daśati 8	360-369
Daśati 9	370-380
Daśati 10	381-390

Classification I in Adhyāyas and Khaṇḍas		Classification II in Prapāṭhakas, Ardhas and Daśatis	
Adhyāya V		**Prapāṭhaka V: Ardha I**	
Khaṇḍa I	467-476	Daśati 1	391-398
Khaṇḍa II	477-486	Daśati 2	399-408
Khaṇḍa III	487-496	Daśati 3	409-418
Khaṇḍa IV	497-510	Daśati 4	419-426
Khaṇḍa V	511-522	Daśati 5	427-436
Khaṇḍa VI	523-532		
Khaṇḍa VII	533-544	**Prapāṭhaka V: Ardha II**	
Khaṇḍa VIII	544-553	Daśati 6	437-446
Khaṇḍa IX	554-565	Daśati 7	447-456
Khaṇḍa X	566-577	Daśati 8	457-466
Khaṇḍa XI	578-585	Daśati 9	467-476
		Daśati 10	477-486
Adhyāya VI			
Khaṇḍa I	586-594	**Prapāṭhaka VI: Ardha I**	
Khaṇḍa II	595-601	Daśati 1	487-496
Khaṇḍa III	602-614	Daśati 2	497-510
Khaṇḍa IV	615-626	Daśati 3	511-522
Khaṇḍa V	627-640	Daśati 4	523-532
		Daśati 5	533-544
Mahānāmnyarcika	641-650		
		Prapāṭhaka VI: Ardha II	
		Daśati 6	545-553
		Daśati 7	554-565
		Daśati 8	566-577
		Daśati 9	578-585